श्रीसोमनाथसंस्कृतविश्वविद्यालयग्रन्थमाला-१०

# वाक्यार्थज्योतिः
# Vākyārthajyotiḥ

अङ्कः - 2 वर्षः - 2015-16

प्रधानसम्पादकः

प्रो. अर्कनाथचौधरी

सम्पादकौ

डॉ. पङ्कजकुमारः रावलः

डॉ. शत्रुघ्नपाणिग्राही

श्रीसोमनाथसंस्कृतयुनिवर्सिटी

वेरावलम्

**प्रकाशकः -**

**प्रो. महेन्द्रकुमारः दवे**
का.कुलसचिवः
श्रीसोमनाथसंस्कृतयुनिवर्सिटी
राजेन्द्रभुवनरोड, वेरावलम् - ३६२ २६६
गीर-सोमनाथजनपदम्, गुजरातम्
दूरभाष : ०२८७६-२४४५३२, फेक्सः २४४४१७
www.sssu.ac.in

**सहसम्पादकः समन्वयकश्च -**

डॉ. कार्तिकपण्ड्या
संशोधनाधिकारी
श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

***© Shree Somnath Sanskrit University, Veraval - 2018***

**प्रथमं संस्करणम् -** मई - २०१८

**प्रतयः** - ३५०

**ISBN** - 978-93-83097-27-2

**मूल्यम्** - रु. २०० /-

**मुद्रकः** - जलाराम ग्राफिक्स एन्ड ओफसेट
परमहंस ऍपार्टमेन्ट के पास,
होटल कावेरी के पीछे, एस.टी.रोड, वेरावल-३६२ २६६
जि. गीर सोमनाथ, गुजरात (भारत)
दूरभाष : (०२८७६) २२१८६१

११ संस्कृतसाहित्ये पित्रो: गौरवम् १२१-१२५

डॉ. डायालाल एम. मोकरिया

१२ ज्यौतिषशास्त्रे नवविधकालमानविचार: १२६-१३३

डॉ. रमेशचन्द्रबाबूलालशुक्लः

१३ मन्त्रार्थविचार: १३४-१४१

डॉ. शत्रुघ्नपाणिग्राही

१४ व्याप्तिस्वरूपविचार: १४२-१५२

डॉ. बी. उमा महेश्वरी

१५ भावविकारसन्दर्भे भावपदार्था: १५३-१६१

डॉ. दीपेश: विनोद: कतिरा

१६ भारतीयदर्शनेषु पाठसमालोचनपद्धति: १६२-१७८

डॉ. जानकीशरणः आचार्यः

१७ अनन्योक्तेरन्योक्तेरीषदास्वाद: १७९-१८९

डॉ. अमृतलालः भोगायता

१८ डॉ. गोस्वामी बलभद्रप्रसाद शास्त्री कृत "इन्दिराजीवनम्" शतककाव्य का शास्त्रीय अध्ययन १९०-२०१

डॉ. कार्तिकः पण्ड्या

१९ Copyrights in India: An Introduction २०२-२०८

**Ravindra Suryakant Kale**

# व्याप्तिस्वरूपविचारः

डॉ.बी. उमामहेश्वरी
सहायकाचार्यःदर्शनविभागस्य,
श्रीसोमनाथसंस्कृतविश्वविद्यालयः, वेरावलम्

अद्यवयं व्याप्तेः विषये किञ्चित् चर्चां कुर्मः। तत्र का नाम व्याप्तिः? तत्पूर्वं व्याप्तेः कथनस्य का आवश्यकता? तत्र सङ्गतिः का? इति जिज्ञासा भवति सर्वेषां मनसि। तस्य समाधानं कारिकावल्यां दर्शितम्—

"व्यापारस्तु परामर्शः करणं व्याप्तिधीर्भवेत्"[1] इति।

अर्थात् अनुमानप्रमाणनिरूपणावसरे किं नामानुमानम्, इति पृष्टे सति अनुमितिकरणम् अनुमानम् इति अकथयत्। अर्थात् अनुमितेः यत् करणं साधनं भवति तदेव अनुमानम् इति। पुनस्तत्र जिज्ञासा भवति का नाम अनुमितिः इति। तस्य समाधानं तर्कसंङ्ग्रहे प्रदत्तं वर्तते "परामर्शजन्यं ज्ञानम् अनुमितिः" इति। अर्थात् परामर्शजन्यत्वे सति ज्ञानत्वं अनुमितेः लक्षणम् इति। पुनर्जिज्ञासा भवति 'परामर्शः' कः? इति। तर्कसङ्ग्रहे 'व्याप्तिविशिष्टपक्षधर्मताज्ञानं परामर्शः" इति। अर्थात् 'व्याप्तिविषयकं यत् पक्षधर्मताज्ञानम् तत् परामर्शः' इति। पक्षनिष्ठविशेष्यतानिरूपिता या हेतुनिष्ठा प्रकारता, तन्निरूपिता या व्याप्तिनिष्ठा प्रकारता, तच्छालिज्ञानं परामर्शः । अर्थात् एतादृशपरामर्शजन्यत्वे सति ज्ञानत्वम् अनुमितेः लक्षणमिति। अनुमितिपरामर्शयोः कार्यकारणभावसम्बन्धः। स च 'पर्वतो वह्निमान् धूमादि' त्यत्र इत्थं भवति—

'पर्वतत्वावच्छिन्नोद्देश्यतानिरूपित-संयोगसम्बन्धावच्छिन्न-
वह्नित्वावच्छिन्न-



विधेयताकानुमितिं प्रति वह्नित्वावच्छिन्नप्रकारता- निरूपित-व्याप्तित्वावच्छिन्नप्रकारतानिरूपिता या धूमत्वावच्छिन्नप्रकारता, तन्निरूपिता या पर्वतत्वावच्छिन्ना विशेष्यता तच्छालिनिर्णयः कारणम् इति। स च निर्णयः वह्निव्याप्यधूमवान्पर्वत इत्याकारकः' भवति इति।

पुनस्तत्र आकांक्षा भवति का नाम व्याप्तिः? इति। तत्र व्याप्तेः स्वरूपं यथा- "व्याप्तिः साध्यवदन्यस्मिन्नसम्बन्ध उदाहृतः"[2] इति अर्थात् साध्यवदन्याऽवृत्तित्त्वम् व्याप्तिः इति। वस्तुतः शास्त्रस्यास्य प्रवृत्तिः त्रिधा भवति, 'उद्देशोलक्षणापरीक्षा'[3]चेति भेदात् इति तर्कभाष्यां केशवमिश्रः तत्र उद्देशो नाम 'नाम्ना वस्तुसङ्कीर्तनमुद्देशः' इति। अर्थात् सङ्केतमात्रेण वस्तूनां कथनं उद्देश इति। यथा- "प्रमाणप्रमेयसंशयप्रयोजनदृष्टान्तसिद्धान्तावयव-तर्कनिर्णयवादजल्पवितण्डाहेत्वाभासच्छलजातिनिग्रहस्थानानां तत्त्वज्ञानान्निःश्रेयसाधिगमः" इति सूत्रेण महर्षिगौतमेन न्यायदर्शनस्य उद्देश्यम् उपस्थापितम्।

ततः लक्षणम् - 'दूषणत्रयरहितधर्मो लक्षणम्' अर्थात् अव्याप्त्यतिव्याप्त्यसम्भवदोषत्रयशून्यं लक्षणं लक्षणस्य लक्षणमिति।

तत्र अव्याप्तिर्नाम 'लक्ष्यैकदेशाऽवृत्तित्त्वम्' अर्थात् लक्ष्यतावच्छेदकसमानाधिकरणात्यन्ताभावप्रतियोगित्वम् अव्याप्तिरिति। यथा – 'गोः कपिलत्वम्' इति गोर्लक्षणकथने सति, तत्र लक्ष्यः- गौः, लक्ष्यतावच्छेदकं – गोत्त्वम्, तत्समानाधिकरणः शुक्लगौः, तत्र वर्तते यः अत्यन्ताभावः - कपिलरूपवत्त्वं नास्तीत्यभावः, तत्प्रतियोगित्त्वं कपिलरूपवत्त्वं वर्तमानमिति, गोः कपिलरूपवत्त्वे शुक्लगवि अव्याप्तिः भवति । अतः ईदृशलक्षणं वक्तुं न शक्यते अव्याप्तिग्रस्तत्वात्।

अतिव्याप्तिः – "अलक्ष्ये लक्षणसत्त्वम्" अर्थात् लक्ष्यतावच्छेदकसामानाधिकरण्ये सति लक्ष्यतावच्छेदकावच्छिन्नप्रतियोगिता कभेदसामानाधिकरण्यम् अतिव्याप्तिरिति। यथा – 'गोः शृङ्गित्वम्' इति गोः लक्षणकथने, लक्ष्यः गौः, लक्ष्यतावच्छेदकं गेत्वम्, गोत्त्वसमानाधिकरणत्वे सति लक्ष्यतावच्छेदकगोत्वावच्छिन्नप्रतियोगि ताको यो भेदः गौः नास्तीति भेदः, तदधिकरणं महिषादिः, तत्सामानाधिकरण्यमेव शृङ्गित्वे सत्त्वात्, अलक्ष्ये लक्षणस्य गमनादतिव्याप्तिः भवति। अतः इदमपि लक्षणं भवितुं नार्हति।

असम्भवः – 'लक्ष्यमात्राऽवृत्तित्वम्' अर्थात् लक्ष्यतावच्छेदकव्यापकीभूताभावप्रतियोगित्वम् असम्भव इत्याख्यायते। यथा – लक्ष्यः गौः, लक्ष्यतावच्छेदकं गेत्वम्, गोत्वव्यापकीभूतः यः एकशफवत्वाभावः, तत्प्रतियोगित्वमेकशफवत्त्वे इति एकशफवत्वं लक्ष्यभूतगवि अभावात् असम्भवः। अतः एतादृशदूषणत्रयरहितं "अव्याप्तिरहितत्त्वे सति अतिव्याप्तिरहितत्त्वे सति असम्भवरहितधर्मवत्त्वं लक्षणत्वम्" भवति। तच्च गोः सास्नादिमत्त्वमिति असाधारणधर्मलक्षणमेव गोः लक्षणं भवतीति तर्कसङ्ग्रहादिषु सुष्ठु प्रतिपादितम्।

तत्र व्याप्तेः पञ्चलक्षणानि पूर्वपक्षलक्षणानीति नाम्ना प्रतिपादितानि। तानि च पञ्चलक्षण्यां यथा—

(१) साध्याभाववदवृत्तित्वम्।

(२) साध्यवद्भिन्नसाध्याभाववदवृत्तित्वम्।

(३) साध्यवत्प्रतियोगिकान्योन्याभावाऽसामानाधिकरण्यम्।

(४) सकलसाध्याभाववन्निष्ठाऽत्यन्ताभावप्रतियोगित्वम्।

(५) साध्यवदन्याऽवृत्तित्वम् चेति। तन्मध्यतोऽत्राधुना पञ्चमं लक्षणं



निरूप्यते।

तत्र व्याप्तिः द्विविधा—अन्वयव्याप्तिः, व्यतिरेकव्याप्तिः। अन्वयव्याप्तिस्तावत् – तत्सत्त्वे तत्सत्वम् इति अर्थात् हेतुसत्त्वे साध्यसत्त्वम् इति। व्यतिरेकव्याप्तिस्तावत् तदभावे तदभावः अर्थात् साध्याभावे हेत्वभावः इति। अधुना अन्वयव्याप्तिं विचारयामः। तत्र अन्वयव्याप्तेः समन्वयार्थं पक्षहेतुदृष्टान्तानां सत्त्वम् आवश्यकम्। यथा 'पर्वतो वह्निमान् धूमात्, महानसवत्' अत्र पक्षः - पर्वतः, साध्यः-वह्निः, हेतुः-धूमः, दृष्टान्तः-महानसः। तत्र साध्यवदन्याऽवृत्तित्वम् इति वह्निनिरूपितव्याप्तेः धूमे समन्वयः क्रियते। तत्र पक्षः पर्वतः, पर्वते संयोगसम्बन्धेन धूमो हेतुः, संयोगेन वह्निः साध्यः, संयोगेन साध्यवान्-वह्निमान् पर्वतमहानसादिः, तदन्यः वह्निमान् न इत्याकारकः, वह्निमत्पर्वतमहानसादिभिन्नः, जलह्रदादिः, तदवृत्तित्वम् - वृत्तित्त्वाभावः जलह्रदादिनिरूपितवृत्तित्त्वम् मीनशैवालादौ वृत्तित्वाभावः धूमे इति सद्धेतौ लक्षणसमन्वयः।

तथा असद्धेतौ व्याप्तेः समन्वयो न भवति यथा – 'पर्वतो धूमवान् वह्नेः, महानसवत्' इत्यत्र साध्याभाववति धूमाभाववति अयोगोलके हेतोः वह्नेः सत्त्वात् हेतुरयं व्यभिचारी। तथा च अत्र साध्यः धूमः, संयोगेन साध्यवान् धूमवान् पर्वतादिः, साध्यवदन्यः - पर्वतादन्यः अयोगोलकादिः, तत्र हेतोः वह्नेः वृत्तित्त्वात्, अवृत्तित्त्वं नास्तीति असद्धेतौ लक्षणस्य अगमनान्नातिव्याप्तिरिति।

तत्र शङ्का – साध्यसम्बन्धस्य संयोगादेर्व्याप्तिरूपत्वेन निर्देशस्तु न कृतः, अतः पक्षे वास्तविकसम्बन्धं परित्यज्य अन्यसम्बन्धमादाय अर्थात् पर्वतो वह्निमान् धूमादित्यत्र संयोगं परित्यज्य समवायमादाय, समवायेन साध्यवान् वह्निमान् वह्नेरवयवः, समवायेन साध्यवदन्यः

पर्वतोऽपि, तत्र पर्वते धूमादेः वृत्तित्वमेवास्ति न तु अवृत्तित्वमिति सद्धेतौ धूमे व्याप्तेरगमनादव्याप्तिः खलु इति।

तादृशशङ्कां वारयितुं व्याप्तिलक्षणशरीरे येन सम्बन्धेन साध्यं तेनैव सम्बन्धेन साध्यवान् बोध्य इति साध्यस्य सम्बन्धो निवेशनीयम्। अत्र संयोगादिसम्बन्धेन पर्वतादौ वह्न्यादिः, संयोगादिनैव साध्यवान् वह्निमान् च ग्राह्यं न तु अन्येन सम्बन्धेनेत्यर्थः। पक्षे यः साध्यस्य सम्बन्धः सः साध्यतावच्छेदकसम्बन्धः इति। तथा सति लक्षणं भवति 'साध्यतावच्छेदकसम्बन्धावच्छिन्नसाध्यवदन्यवृत्तित्वाभाववत्त्वम्' व्याप्तेः लक्षणमिति। तर्हि न पर्वतो वह्निमान् धूमादित्यत्र सद्धेतौ अव्याप्तिः।

अत्र साध्यतावच्छेदकसम्बन्धः वह्नेः संयोगादिः, साध्यतावच्छेदकसंयोगावच्छिन्नसाध्यवान् पर्वतादिरेव, तदन्यः जलह्रदादिः, तद्वृत्तित्वं मीनादौ, वृत्तित्वाभाववत्त्वम् धूमे इति लक्षणसमन्वय इति।

तथापि "पर्वतो वह्निमान् धूमात्" इत्यत्र धूमे लक्षणस्याव्याप्तिर्भवति। तथा हि - साध्यतावच्छेदकसंयोगसम्बन्धावच्छिन्नसाध्यवह्निमान् पर्वत एव ग्राह्यः। तदन्यः महानसादिः। तत्र धूमस्य वृत्तित्वादवृत्तित्वं नास्तीत्यव्याप्तिः। अतः लक्षणे साध्यवानित्यनेन यथा सर्वेषां साध्यवतां ग्रहणं भवेत् तथा अर्थः करणीय इति स चार्थः उक्तः, 'साध्यवत्त्वावच्छिन्नप्रतियोगिताकः' इति तदन्यः – साध्यवत्त्वावच्छिन्नप्रतियोगिताकभेदवानित्यर्थः। तथा सति लक्षणमेवं परिणमति - "साध्यतावच्छेदकसम्बन्धावच्छिन्नसाध्यवत्त्वावच्छिन्नप्रतियोगिताकभेदाधिकरणनिरूपितवृत्तित्वाभाववत्त्वम्" इति। तथा च पर्वतो वह्निमान् धूमादित्यत्र साध्यतावच्छेदकसंयोगसम्बन्धावच्छिन्न-साध्यवत्त्व-वह्निमत्त्वावच्छिन्न पर्वतमहानसादिप्रतियोगिताकभेदाधिकरण-जलह्रदा दिनिरूपितमीनशैवालादि-निष्ठवृत्तित्त्वाभाववत्त्वम् धूमे इति लक्षणसमन्वय इति।



पुनस्तत्र शङ्का भवति, एवं लक्षणपरिष्कारे कृतेऽपि साध्यवदन्ये वृत्तिः केन सम्बन्धेनेति नोक्तः, अतः समवायसम्बन्धमादाय पर्वतो वह्निमान् धूमादित्यत्र अव्याप्तिः स्यात्, तथा च साध्यतावच्छेदकसंयोगसम्बन्धावच्छिन्न-साध्यवत्त्ववह्निमत्वावच्छिन्न- प्रतियोगिताकभेदस्य 'संयोगावच्छिन्न-वह्निमत्त्वावच्छिन्नं न' इत्याकारकस्य अधिकरणं यथा जलह्रदः तथा धूमस्याऽवयवा अपि। तेषु समवायसम्बन्धेन धूमस्य वृत्तित्वात्, अवृत्तित्त्वाऽभावात् अव्याप्तिः इति। तत्र अव्याप्तिवारणार्थं येन सम्बन्धेन हेतुता तेनैव सम्बन्धेन साध्यवदन्यवृत्तित्त्वं वक्तव्यम्। तर्हि लक्षणमेवं सम्पद्यते साध्यतावच्छेदकसम्बन्धावच्छिन्नसाध्यवत्त्वावच्छिन्नप्रतियो-गिताकभेदाधिकरणनिरूपित-हेतुतावच्छेदकसम्बन्धावच्छिन्नवृत्तित्त्वाभाववत्त्वम् व्याप्तेः लक्षणमिति।

तथा च पर्वतो वह्निमान् धूमादित्यत्र लक्षणसमन्वयः। साध्यतावच्छेदकसंयोगसम्बन्धावच्छिन्न- साध्यवत्त्ववह्निम-त्वावच्छिन्न- पर्वतमहानसादिप्रतियोगिताकभेदाधिकरण-जलह्रदधूमावयवादिनिरूपित- हेतुतावच्छेदकसंयोगसम्बन्धा- वच्छिन्न-मीनदिधूमावयवान्तरादिनिष्ठ-वृत्तित्त्वाऽभाववत्त्वं धूमे इति लक्षणसमन्वयः। अत्र अवयवी धूमः, अवयवेषु समवायेन वर्तते न तु संयोगेन इति।

तत्र पुनः शङ्का भवति साध्यवदन्याऽवृत्तित्वमित्यत्र

साध्यवदन्यवृत्तित्त्वस्य यस्यकस्यचिदेव अभावोऽपि स्वीकार्यः। तथा च पर्वतो धूमवान् वह्नेः' इति व्यभिचारिस्थले संयोगेन धूमवदन्यजलह्रद-निरूपितमीनमात्रनिष्ठवृत्तित्त्वस्य वह्नौ सत्त्वात् अतिव्याप्तिः स्यात्। अतः साध्यवदन्यवृत्तित्वञ्च साध्यवदन्यवृत्तित्वत्वावच्छिन्नप्रतियोगिता-काभावेति वक्तव्यम्। तथा च लक्षणमेव पर्यवसति—

"साध्यतावच्छेदकसम्बन्धावच्छिन्नसाध्यवत्त्वावच्छिन्नप्रतियो गिताकभेदाधिकरणनिरूपितहेतुतावच्छेदकसम्बन्धावच्छिन्नवृत्तितात्वा वच्छिन्नप्रतियोगिताकाभाववत्त्वम्" इति।

तथा च धूमवान् वह्नेरित्यत्र नातिव्याप्तिः। तथा हि "साध्यतावच्छेदकसंयोगसम्बन्धावच्छिन्न-साध्यवत्वधूमवत्त्वा-वच्छिन्न-

पर्वतादिप्रतियोगिताकभेदाधिकरणजलह्रद,तप्तायोगोलकादि निरूपित-हेतुतावच्छेदकसंयोगसम्बन्धावच्छिन्न-मीनवह्न्यादिनिष्ठवृत्तितात्वावच्छिन्न-वृत्तित्त्वस्यैव वह्नौ सत्त्वात् तादृशवृत्तित्वप्रतियोगिताकाऽभावस्य असत्त्वान्न वह्नौ अतिव्याप्तिरिति।

तथापि 'विशिष्टं शुद्धान्नातिरिच्यते' इति नियममादाय 'घटः द्रव्यत्ववान् गुणकर्मभेदविशिष्टसत्तावत्त्वात्' इत्यत्र साध्यदद्र-व्यत्त्ववद्रव्या-ऽन्ये गुणे कर्मणि च शुद्धसत्तायाः वृत्तित्त्वात् शुद्धसत्तात्मक-गुणकर्मभेदविशिष्टसत्तात्मकहेतोरपि वृत्तित्त्वात् वृत्तित्त्वाभाववत्त्वं नास्तीति सद्धेतौ अव्याप्तिः स्यात्। अतः तद्वारणाय हेतोः अवृत्तित्त्वम् हेतुतावच्छेदकरूपेण वक्तव्यम् अर्थात् साध्यवदन्यनिरूपितवृत्तिताऽन-वच्छेदकहेतुतावच्छे- दकवत्त्वं वक्तव्यमिति।

तथा सति लक्षणं – 'साध्यतावच्छेदकसम्बन्धावच्छिन्न-साध्यवत्त्वावच्छिन्नप्रतियोगिताकभेदाधिकरणनिरूपितहेतुतावच्छेदक



सम्बन्धावच्छिन्नवृत्तिताऽनवच्छेदक-हेतुतावच्छेदकधर्मवत्त्वम् व्याप्तिः' इति। तथा च 'घटः द्रव्यत्ववान् गुणकर्मभेदविशिष्टसत्तावत्त्वात्' इत्यत्र लक्षणसमन्वयः, तत्र साध्यतावच्छेदकसम्बन्धः समवायसम्बन्धः, साध्यतावच्छेदक-समवायसम्बन्धावच्छिन्नसाध्यवत्त्व द्रव्यत्ववत्त्वा-वच्छिन्न-प्रतियोगिताक-भेदाधिकरण- गुणकर्मनिरूपितहेतुतावच्छेद-कसमवायसम्बन्धावच्छिन्न-सत्ता,गुणकर्मत्वनिष्ठवृत्तितावच्छेदकं सत्तावत्वम्, गुणत्वत्त्व-कर्मत्वत्वादि तादृशवृत्तिताऽनवच्छेदकं यत् गुणकर्मभेदसत्तात्वेत्युभयं हेतुतावच्छेदकं, तद्धर्मवत्त्वस्य हेतौ सत्त्वाल्लक्षणसमन्वयः।

एवं लक्षणपरिष्कारेऽपि घटः वाच्यत्ववान् ज्ञेयत्वात् इति केवलान्वयिसद्धेतौ अव्याप्तिः। अत्र शङ्का भवितुमर्हति यत् वाच्यत्वज्ञेयत्वयोः केवलान्वयित्वं कथमिति। तत्र प्रथमं केवलान्वयित्वं किं इति चेत्, केवलान्वयित्वञ्च – अत्यन्ताऽभावाऽप्रतियोगित्वम्। तत्र साध्यः वाच्यत्वं, हेतुः ज्ञेयत्वं द्वयमपि केवलान्वयिनौ। यथा- वक्तुं योग्यं वाच्यं, नामविषयमिति यावत्। नाम इत्युक्ते शब्दः, स च शक्त्यात्मकवृत्त्या अर्थं बोधयति। शक्तिश्च 'अस्मात्पदादयमर्थो बोद्धव्य' इत्याकारिका ईश्वरेच्छा, इच्छा विषयाः सर्वे विषयाः, सर्वे पदार्था इति। तथा च ईश्वरविषयस्य सर्वत्र सत्त्वात् ईश्वरविषयत्वमेव वाच्यत्त्वं, तच्च सप्तपदार्थेषु वर्तते, न तदाभावत्वमिति अत्यन्ताऽभावाऽप्रतियोगित्वात् वाच्यत्वं केवलान्वयि भवति। एवं ज्ञेयत्वं – ईश्वरीयज्ञानविषयत्वम्, तदपि सर्वपदार्थेषु वर्तते, तदभावः न कुत्रापि, अतः अत्यन्ताऽभावाऽप्रतियोगित्वात् ज्ञेयत्वहेतुरपि केवलान्वयी भवतीत्यर्थः।

तथा च 'घटः वाच्यत्ववान् ज्ञेयत्वात्' (उत ज्ञेयत्ववान् वाच्यत्वादित्यत्र च) इत्यत्र साध्यः हेतुश्च स्वरूपसम्बन्धेन बोध्यौ। तथा च साध्यवाच्यत्ववत्सप्तपदार्थभिन्नस्यैवा- ऽप्रसिद्धत्वात् तन्निरूपितवृत्ति-

तायाः अपि अप्रसिद्ध्या मूलमात्रोक्तलक्षणस्यैव अव्याप्तिः। अतः तादृशं व्याप्तिस्वरूपमेव भवितुं नार्हति खलु, इति चेत् तत्र-ईदृशकेवलान्वय्यनुमानमेव नाङ्गीक्रियते। यतो हि केवलान्वयिनि केवलान्वयित्वग्रहदशायां 'वाच्यो न वे'ति पक्षतात्मकसंशयः नास्ति, सर्वस्यापि वाच्यत्ववत्वात्। तर्हि तादृशसंशयाभावादेव नानुमितिः। तथा व्यतिरेकित्वग्रहदशायां तु भ्रमात्मकव्याप्तिज्ञानात् भ्रमात्मकानुमितिः स्यादेव, अतः स्थलेऽस्मिन् अव्याप्तिकथनमसङ्गतमिति। अतः स्थलान्तरे पुनः दोषं प्रदर्शयति।

'घटः सत्तावान् जातिमत्त्वात्' इत्यत्र तु अव्याप्तिः भवत्येव। तत्र साध्यं हेतुश्च समवायेन बोध्यौ। हेतु जातिमत् घटत्वद्रव्यत्वादयः ग्राह्याः। तथा च साध्यतावच्छेदकसमवायसम्बन्धावच्छिन्नसाध्यवत्त्वसत्ता-वत्त्वावच्छिन्नप्रतियोगिताकभेदाधिकरणसामान्यविशेषादिपदार्थनिरूपितो हेतुतावच्छेदकसमवाय-सम्बन्धावच्छिन्ना वृत्तितैव अप्रसिद्धा। यतो हि सामान्यविशेषसमवायादौ समवायसम्बन्धेन कस्यापि पदार्थस्य अवर्तमानत्वात्। तेन तादृशवृत्तित्वाऽभावोऽपिअप्रसिद्ध इति व्याप्तिलक्षणं जातौ अव्याप्तमित्यतः प्रदर्शितं व्याप्तिलक्षणमेव भवितुं नार्हतीत्युक्त्वा सिद्धान्तलक्षणं वक्ष्यते।

"अथवा हेतुमन्निष्ठविरहाऽप्रतियोगिना।

साध्येन हेतोरैकाधिकरण्यं व्याप्तिरुच्यते"॥[4] इति।

तथा च "हेत्वधिकरणवृत्त्यभावाऽप्रतियोगिसाध्य-सामानाधिकरण्यम्" इति व्याप्तेः सिद्धान्तलक्षणम्। अर्थात् पर्वतो वह्निमान् धूमादित्यत्र हेतुः- धूमः, हेतुमति पर्वते निष्ठा- वृत्तिता यस्य वह्नेः, तादृशो यो विरहः- घटाभावः, तस्य अप्रतियोगि यत् साध्यं वह्निः, तेन सह ऐकाधिकरण्यं – सामानाधिकरण्यम् व्याप्तिः इति। तथा



च तत्र प्रथमं पर्वतो वह्निमान् धूमादित्यत्र लक्षणसमन्वयं पश्यामः।

हेतुः धूमः, हेत्वधिकरणं पर्वतः, हेत्वधिकरणवृत्तिः वह्नेः, वृत्तित्वाभावः घटाभावः, अभावे प्रतियोगी घटः, अप्रतियोगी साध्यः वह्निः, तेन वह्निना सह सामानाधिकरण्यं धूमस्य वर्तते इति लक्षणसमन्वयः।

एवं धूमवान् वह्नेः इत्यत्र नातिव्याप्तिः, तथा हि हेतुः वह्निः, हेत्वधिकरणम् अयोगोलकम्, हेत्वधिकरणवृत्तिः वह्नेः, वृत्तित्वाभावः धूमाभावोऽपि, अयोगोलके धूमाभावस्य सत्त्वात्, तदप्रतियोगि साध्यसामानाधिकरण्यम् अयोगोलके नास्तीति नातिव्याप्तिः।

तथा प्रस्तुते घटः सत्तावान् जातेरित्यत्र नाऽव्याप्ति दोषः। तत्र हेतुः जातिः, हेत्वधिकरणं जात्यधिकरणं द्रव्यगुणकर्माणि,तत्र वृत्तिः सत्ता, वृत्तित्वाभावः, सत्ताभावः न , सत्ताया एव तत्र सत्त्वात्। अपि तु घटाभावः, अभावे प्रतियोगी घटः, अप्रतियोगी साध्यः सत्ता, तादृशसाध्यनिरूपितसामानाधिकरण्यं जात्यात्मकहेतौ इति लक्षणसमन्वयः।

तथैव घटो वाच्यत्ववान् ज्ञेयत्वात् इत्यत्र हेतुः ज्ञेयत्वं, ज्ञेयत्वात्मकहेत्वधिकरणं सप्तपदार्थाः, तत्र वृत्तिः वाच्यत्वं, वृत्तित्वाभावः वाच्यत्वाभावः न, वाच्यत्वस्यैव तत्र सत्त्वात्, अपि तु घटाद्यभावः, अभावे प्रतियोगि घटः, अप्रतियोगि साध्यं वाच्यत्वम्, तन्निरूपितसामानाधिकरण्यम् ज्ञेयत्वहेतौ वर्तते इति लक्षणसमन्वयः।

लक्षणेऽस्मिन्नपि यथा पूर्वपक्षव्याप्तौ अवच्छेदकावच्छिन्नानि निवेशितानि तथैवास्मिन् लक्षणेऽपि निवेशनीयानि। तथा सति लक्षणमेवं सम्पत्स्यते यथा –

प्रतियोगिव्यधिकरण-हेतुतावच्छेदकावच्छिन्न-हेतुतावच्छेदक-

सम्बन्धावच्छिन्नहेत्वधिकरणवृत्त्यभाव-
प्रतियोगिताऽनवच्छेदकसाध्यतावच्छेदकावच्छिन्न-
साध्यसामानाधिकरण्यं व्याप्तेः लक्षणं सम्पन्नम्।

[1]. न्या.सि.मुक्तावली- का. ६६।

[2]. न्या.सि.मु. का. ६८।

[3]तर्कभाषाष-पृ - ८

[4]. न्या.मु. पृ – २३२।